# Natya Shastra Chapter 22

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૨

## Document Information

Text title : naaTyashaastra adhyaaya 22

File name : natya22.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : October 6, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Natya Shastra Chapter 22

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨૨

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ દ્વાવિંશોઽધ્યાયઃ ।

સામાન્યાભિનયો નામ જ્ઞેયો વાગઙ્ગસત્ત્વજઃ ।
તત્ર કાર્યઃ પ્રયત્નસ્તુ નાટ્યં સત્ત્વે પ્રતિષ્ઠિતમ્ ॥ ૧॥

સત્ત્વાતિરિક્તોઽભિનયો જ્યેષ્ઠ ઇત્યભિધીયતે ।
સમસત્ત્વો ભવેન્મધ્યઃ સત્વહીનોઽધમઃ સ્મૃતઃ ॥ ૨॥

અવ્યક્તરૂપં સત્ત્વં હિ વિજ્ઞેયં ભાવસંશ્રયમ્ ।
યથાસ્થાનરસોપેતં રોમાઞ્ચાસ્રાદિભિર્ગુણૈઃ ॥ ૩॥

અલઙ્કારાસ્તુ નાટ્યજ્ઞૈર્જ્ઞેયા ભાવરસાશ્રયાઃ ।
યૌવનેઽભ્યધિકાઃ સ્ત્રીણા વિકારા વક્ત્રગાત્રજાઃ ॥ ૪॥

આદૌ ત્રયોઽઙ્ગજસ્તેષાં દશ સ્વાભાવિકાઃ પરે ।
અયત્નજાઃ પુનઃ સપ્ત રસભાવોપબૃંહિતાઃ ॥ ૫॥

દેહાત્મકં ભવેત્સત્ત્વં સત્ત્વાદ્ભાવઃ સમુત્થિતઃ ।
ભાવાત્સમુત્થિતો હાવો હાવાદ્ધેલા સમુત્થિતા ॥ ૬॥

હેલા હાવશ્ચ ભાવશ્ચ પરસ્પરસમુત્થિતાઃ ।
સત્ત્વભેદે ભવન્ત્યેતે શરીરે પ્રકૃતિસ્થિતાઃ ॥ ૭॥

વાગઙ્ગમુખરાગૈશ્ચ સત્ત્વેનાભિનયેન ચ ।
કવેરન્તર્ગતં ભાવં ભાવયન્ભાવ ઉચ્યતે ॥ ૮॥

[ભાવસ્યાતિકૃતં સત્ત્વં વ્યતિરિક્તં સ્વયોનિષુ ।
નૈકાવસ્થાન્તરકૃતં ભાવં તમિહ નિર્દિશેત્] ॥ ૯॥

તત્રાક્ષિભ્રૂવિકારાઢ્યઃ શૃઙ્ગારાકારસૂચકઃ ।

સગ્રીવારેચકો જ્ઞેયો હાવઃ સ્થિતસમુત્થિતઃ ॥ ૧૦॥

યો વૈ હાવઃ સ એવૈષા શ઼ૃઙ્ગારરસસંભવા ।
સમાખ્યાતા બુધૈર્હેલા લલિતાભિનયાત્મિકા ॥ ૧૧॥

લીલા વિલાસો વિચ્છિત્તિર્વિભ્રમઃ કિલિકિઞ્ચિતમ્ ।
મોટ્ટાયિતં કુટ્ટિમિતં બિબ્બોકો લલિતં તથા ॥ ૧૨॥

વિહૃતં ચેતિ વિજ્ઞેયા દશ સ્ત્રીણાં સ્વભાવજાઃ ।
પુનરેષાં સ્વરૂપાણિ પ્રવક્ષ્યામિ પૃથક્પૃથક્ ॥ ૧૩॥

વાગઙ્ગાલઙ્કારૈઃ શિષ્ટૈઃ પ્રીતિપ્રયોજિતૈર્મધુરૈઃ ।
ઇષ્ટજનસ્યાનુકૃતિર્લીલા જ્ઞેયા પ્રયોગજ્ઞૈઃ ॥ ૧૪॥

સ્થાનાસનગમનાનાં હસ્તભ્રૂનેત્રકર્મણાં ચૈવ ।
ઉત્પદ્યતે વિશેષો યઃ શ્લિષ્ટઃ સ તુ વિલાસઃ સ્યાત્ ॥ ૧૫॥

માલ્યાચ્છાદનભૂષણ વિલેપનાનામનાદરન્યાસઃ ।
સ્વલ્પોઽપિ પરાં શોભાં જનયતિ યસ્માત્તુ વિચ્છિતિઃ ॥ ૧૬॥

વિવિધાનામર્થાનાં વાગઙ્ગાહાર્યસત્ત્વાનામ્ ।
મદરાગહર્ષજનિતો વ્યત્યાસો વિભ્રમો જ્ઞેયઃ ॥ ૧૭॥

સ્મિતરુદિતહસિતભયહર્ષગર્વદુઃખશ્રમાભિલાષાણામ્।
સઙ્કુરકરણં હર્ષાદસકૃત્  કિલિકિઞ્ચિતં જ્ઞેયમ્ ॥ ૧૮॥

ઇષ્ટજનસ્ય કથાયાં લીલાહેલાદિદર્શને વાપિ ।
તદ્ભાવભાવનાકૃતમુક્તં મોટ્ટાયિતં નામ ॥ ૧૯॥

કેશસ્તનધરાદિગ્રહણાદતિહર્ષસંભ્રમોત્પન્નમ્ ।
કુટ્ટમિતં વિજ્ઞેઅયં   સુખમપિ દુઃખોપચારેણ ॥ ૨૦॥ ।

ઇષ્ટાનાં ભાવાનાં પ્રાપ્તાવભિમાનગર્વસંભૂતઃ ।
સ્ત્રીણામનાદરકૃતો બિબ્બોકો નામ વિજ્ઞેયઃ ॥ ૨૧॥

હસ્તપાદાઙ્ગવિન્યાસો ભ્રૂનેત્રોષ્ઠપ્રયોજિતઃ ।
સૌકુમાર્યાદ્ભવેદ્યસ્તુ લલિતં તત્પ્રકીર્તિતમ્ ॥ ૨૨॥

[કરચરણાઙ્ગન્યાસઃ સભ્રૂનેત્રોષ્ઠસમ્પ્રયુક્તસ્તુ ।
સુકુમારવિધાનેન સ્ત્રીભિઉરિતીદં સ્મૃતં લલિતમ્] ॥ ૨૩॥

વાક્યાનાં પ્રીતિયુક્તાનાં પ્રાપ્તાનાં યદભાષણમ્ ।
વ્યાજાત્સ્વભાવતો વાપિ વિહૃતં નામ તદ્ભવેત્ ॥ ૨૪॥

[પ્રાપ્તાનામપિ વચસાં ક્રિયતે યદભાષણં હ્રિયા સ્ત્રીભિઃ ।
વ્યાજાત્સ્વભાવતો વાપ્યેતત્સમુદાહૃતં વિહૃતમ્] ॥૨૫॥

શોભા કાન્તિશ્ચ દીપ્તિશ્ચ તથા માધુર્યમેવ ચ ।
ધૈર્યં પ્રાગલ્ભ્યમૌદાર્યમિત્યેતે સ્યુરયત્નજાઃ ॥ ૨૬॥

રૂપયૌવનલાવણ્યૈરુપભોગોપબૃંહિતૈઃ ।
અલઙ્કરણમઙ્ગાનાં શોભેતિ પરિકીર્તિતા ॥ ૨૭॥

વિજ્ઞેયા ચ તથા કાન્તિઃ શોભૈવાપૂર્ણમન્મથા ।
કાન્તિરેવાતિવિસ્તીર્ણા દીપ્તિરિત્યભિધીયતે ॥ ૨૮॥

સર્વાવસ્થાવિશેષેષુ દીપ્તેષુ લલિતેષુ ચ ।
અનુલ્બણત્વં ચેષ્ટાયા માધુર્યમિતિ સંજ્ઞિતમ્ ॥ ૨૯॥

ચાપલેનાનુપહતા સર્વાર્થેષ્વવિકત્થના ।
સ્વાભાવિકી ચિત્તવૃત્તિર્ધૈર્યમિત્યભિધીયતે ॥ ૩૦॥

પ્રયોગનિસ્સાધ્વસતા પ્રાગલ્ભ્યં સમુદાહૃતમ્ ।
ઔદાર્યં પ્રશ્રયઃ પ્રોક્તઃ સર્વાવસ્થાનુગો બુધૈઃ ॥ ૩૧॥

સુકુમારે ભવન્ત્યેતે પ્રયોગે લલિતાત્મિકે ।
વિલાસલલિતે હિત્વા દીપ્તેઽપ્યેતે ભવન્તિ હિ ॥ ૩૨॥

શોભા વિલાસો માધુર્યં સ્થૈર્યં ગામ્ભીર્યમેવ ચ ।
લલિતૌદાર્યતેજાંસિ સત્ત્વભેદાસ્તુ પૌરુષાઃ ॥ ૩૩॥

દાક્ષ્યં શૌર્યમથોત્સાહો નીચાર્થેષુ જુગુપ્સનમ્ ।
ઉત્તમૈશ્ચ ગુણૈઃ સ્પર્ધા યતઃ શોભેતિ સા સ્મૃતા ॥ ૩૪॥

ધીરસંચારિણી દૃષ્ટિર્ગતિર્ગોવૃષભાઞ્ચિતા ।
સ્મિતપૂર્વમથાલાપો વિલાસ ઇતિ કીર્તિતઃ ॥ ૩૫॥

અભ્યાસત્કરણાનાં તુ શ્લિષ્ટત્વં યત્ર જાયતે ।
મહત્સ્વપિ વિકારેષુ તન્માધુર્યમિતિ સ્મૃતમ્ ॥ ૩૬॥

ધર્માર્થકામસંયુક્તાચ્છુભાશુભસમુત્થિતાત્ ।
વ્યવસાયાદચલનં સ્થૈર્યમિત્યભિસંજ્ઞિતમ્ ॥ ૩૭॥

યસ્ય પ્રભાવાદાકારા હર્ષક્રોધભયાદિષુ ।
ભાવેષુ નોપલક્ષ્યન્તે તદ્ગામ્ભીર્યમિતિ સ્મૃતમ્ ॥ ૩૮॥

અબુદ્ધિપૂર્વકં યત્તુ નિર્વિકારસ્વભાજમ્ ।
શ઼ૃઙ્ગારાકારચેષ્ટત્વં લલિતં તદુદાહૃતમ્ ॥ ૩૯॥

દાનમભ્યુપપત્તિશ્ચ તથા ચ પ્રિયભાષણમ્ ।
સ્વજને ચ પરે વાપિ તદૌદાર્યં પ્રકીર્તિતમ્ ॥ ૪૦॥

અધિક્ષેપાવમાનાદેઃ પ્રયુક્તસ્ય પરેણ યત્ ।
પ્રાણત્યયેઽપ્યસહનં તત્તેજઃ સમુદાહૃતમ્ ॥ ૪૧॥

સત્ત્વજોઽભિનયોઃ પૂર્વં મયા પ્રોક્તઓ દ્વિજોત્તમાઃ ।
શારીરં ચાપ્યાભિનયં વ્યાખ્યાસ્યામ્યનુપૂર્વશઃ ॥ ૪૨॥

ષડાત્મકસ્તુ શારીરો વાક્યં સૂચાઙ્કુરસ્તથા ।
શાખા નાટ્યાયિતં ચૈવ નિવૃત્ત્યઙ્કુર એવ ચ ॥ ૪૩॥

નાનારસાર્થયુક્તૈર્વૃત્તનિબન્ધૈઃ કૃતઃ સચૂર્ણપદૈઃ ।
પ્રાકૃતસંસ્કૃતપાઠો વાક્યાભિનયો બુધૈર્જ્ઞેયઃ ॥ ૪૪॥

વાક્યર્થો વાક્યં વા સત્ત્વાઙ્ગૈઃ સૂચ્યતે યદા પૂર્વમ્ ।
પશ્ચાદ્વાક્યાભિનયઃ સૂચેત્યભિસંજ્ઞિતા સા તુ ॥ ૪૫॥

હૃદયસ્થો નિર્વચનૈરઙ્ગાભિનયઃ કૃતો નિપુણસાધ્યઃ ।
સૂચૈવોત્પત્તિકૃતો વિજ્ઞેયસ્ત્વઙ્કુરાભિનયઃ ॥ ૪૬॥

યત્તુ શિરોમુખજઙ્ઘોરુપાણિપાદૈર્યથાક્રમં ક્રિયતે ।
શાખાદર્શનમાર્ગઃ શાખાભિનયઃ સ વિજ્ઞેયઃ ॥ ૪૭॥

નાટ્યાયિતમુપચારૈર્યઃ ક્રિયતેઽભિનયસૂચયા નાટ્યે ।
કાલપ્રકર્ષહેતોઃ પ્રવેશકૈઃ સંગમો યાવત્ ॥ ૪૮॥

સ્થાને ધ્રુવાસ્વભિનયો યઃ ક્રિયતે હર્ષશોકરોષાદ્યૈઃ ।
ભાવરસસમ્પ્રયુક્તૈર્જ્ઞેયં નાટ્યાયિતં તદપિ ॥ ૪૯॥

યત્રાન્યોક્તં વાક્યં સૂચાભિનયેન યોજયેદન્યઃ ।
તત્સંબન્ધાર્થકથં ભવેન્નિવૃત્ત્યઙ્કુરઃ સોઽથ ॥ ૫૦॥

એતેષાં તુ ભવેન્માર્ગો યથાભાવરસાન્વિતઃ ।

કાવ્યવસ્તુષુ નિર્દિષ્ટો દ્વાદશાભિનયાત્મકઃ ॥ ૫૧॥

આલાપશ્ચ પ્રલાપશ્ચ વિલાપઃ સ્યાત્તથૈવ ચ ।
અનુલાપોઽથ સંલાપસ્ત્વપલાપસ્તથૈવ ચ ॥ ૫૨॥

સન્દેશશ્ચાતિદેશશ્ચ નિર્દેશઃ સ્યાત્તથાપરઃ ।
ઉપદેશોઽપદેશશ્ચ વ્યપદેશશ્ચ કીર્તિતઃ ॥ ૫૩॥

આભાષણં તુ યદ્વાક્યમાલાપો નામ સ સ્મૃતઃ ।
અનર્થકં વચો યત્તુ પ્રલાપઃ સ તુ કીર્તિતઃ ॥ ૫૪॥

કરુણપ્રભવો યસ્તુ વિલાપઃ સ તુ કીર્તિતઃ ।
બહુશોઽભિહિતં વાક્યમનુલાપ ઇતિ સ્મૃતઃ ॥ ૫૫॥

ઉક્તિપ્રત્યુક્તિસંયુક્તઃ સંલાપ ઇતિ કીર્તિતઃ ।
પૂર્વોક્તસ્યાન્યથાવાદો હ્યપલાપ ઇતિ સ્મૃતઃ ॥ ૫૬॥

તદિદં વચનં બ્રૂહીત્યેષ સન્દેશ ઉચ્યતે ।
યત્ત્વયોક્તં મયોક્તં તત્સોઽતિદેશ ઇતિ સ્મૃતઃ ॥ ૫૭॥

સ એષોઽહં બ્રવીમીતિ નિર્દેશ ઇતિ કીર્તિતઃ ।
વ્યાજાન્તરેણ કથનં વ્યપદેશ ઇહોચ્યતે ॥ ૫૮॥

ઇદં કુરુ ગૃહાણેતિ હ્યુપદેશઃ પ્રકીર્તિતઃ ।
અન્યાર્થકથનં યત્ સ્યાત્ સોઽપદેશઃ પ્રકીર્તિતઃ ॥ ૫૯॥

એતે માર્ગાસ્તુ વિજ્ઞેયાઃ સર્વાભિનયયોજકાઃ ।
સપ્તપ્રકારમેતેષાં પુનર્વક્ષ્યામિ લક્ષણમ્ ॥ ૬૦॥

પ્રત્યક્ષશ્ચ પરોક્ષશ્ચ તથા કાલકૃતાસ્ત્રયઃ ।
આત્મસ્થશ્ચ પરસ્થશ્ચ પ્રકારાઃ સપ્ત એવ તુ ॥ ૬૧॥

એષા બ્રવીમિ નાહં ભો વદામીતિ ચ યદ્વચઃ ।
પ્રત્યક્ષશ્ચ પરોક્ષશ્ચ વર્તમાનશ્ચ તદ્ભવેત્ ॥ ૬૨॥

અહં કરોમિ ગચ્છામિ વદામિ વચનં તવ ।
આત્મસ્થો વર્તમાનશ્ચ પ્રત્યક્ષશ્ચૈવ સ સ્મૃતઃ ॥ ૬૩॥

કરિષ્યામિ ગમિષ્યામિ વદિષ્યામીતિ યદ્વચઃ ।
આત્મસ્થશ્ચ પરોક્ષશ્ચ ભવિષ્યત્કાલ એવ ચ ॥ ૬૪॥

હતા જિતા ચ ભગ્નાશ્ચ મયા સર્વે દ્વિષદ્ગણાઃ ।
આત્મસ્થશ્ચ પરોક્ષશ્ચ વૃત્તકાલશ્ચ સ સ્મૃતઃ ॥ ૬૫॥

[ત્વયા હત જિતાશ્ચેતિ યો વદેન્નાટ્યકર્મણિ ।
પરોક્ષશ્ચ પરસ્થશ્ચ વૃત્તકાલસ્તથૈવ ચ  ॥ ૬૬॥

એષ બ્રવીમિ કુરુતે ગચ્છતીત્યાદિ યદ્વચઃ ।
પરસ્થો વર્તમાનશ્ચ (પ્રત્યક્ષશ્ચ) ભવેત્તથા ॥ ૬૭॥

સ ગચ્છતિ કરોતીતિ વચનં યદુતાહૃતમ્ ।
પરસ્થં વર્તમાનં ચ પરોક્ષં ચૈવ તદ્ભવેત્ ॥ ૬૮॥

કરિષ્યન્તિ ગમિષ્યન્તિ વદિષ્યન્તીતિ યદ્વચઃ ।
પરસ્થમેષ્યત્કાલં ચ પરોક્ષં ચૈવ તદ્ભવેત્] ॥ ૬૯॥

હસ્તમન્તરતઃ કૃત્વા યદ્વદેન્નાટ્યકર્મણિ ।
આત્મસ્થં હૃદયસ્થં ચ પરોક્ષં ચૈવ તન્મતમ્ ॥ ૭૦॥

પરેષામાત્મનશ્ચૈવ કાલસ્ય ચ વિશેષણાત્ ।
સપ્તપ્રકારસ્યાસ્યૈવ ભેદા જ્ઞેયા અનેકધા ॥ ૭૧॥

એતે  પ્રયોગા વિજ્ઞેયા માર્ગાભિનયયોજિતાઃ ।
એતેષ્વિહ વિનિષ્પન્નો વિવિધોઽભિનયો  ભવેત્ ॥ ૭૨॥

શિરો હસ્તકટીવક્ષોજઙ્ઘોરુકરણેષુ તુ ।
સમઃ કર્મવિભાગો યઃ સામાન્યાભિનયસ્તુ સઃ ॥ ૭૩॥

લલિતૈર્હસ્તસંચારસ્તથા મૃદ્વઙ્ગચેષ્ટિતૈઃ ।
અભિનેયસ્તુ નાટ્યજ્ઞૈ રસભાવસમન્વિતૈઃ ॥ ૭૪॥

અનુદ્ધતમસંભ્રાન્તમનાવિદ્ધાઙ્ગચેષ્ટિતમ્ ।
લયતાલકલાપાતપ્રમાણનિયતાત્મકમ્ ॥ ૭૫॥

સુવિભક્તપદાલાપમનિષ્ઠુરમકાહલમ્ ।
યદીદૃશં ભવેન્નાટ્યં જ્ઞેયમાભ્યન્તરં તુ તત્ ॥ ૭૬॥

એતદેવ વિપર્યસ્તં સ્વચ્છન્દગતિચેષ્ટિતમ્ ।
અનિબદ્ધગીતવાદ્યં નાટ્યં બાહ્યમિતિ સ્મૃતમ્ ॥ ૭૭॥

લક્ષણાભ્યન્તરત્વાદ્ધિ  તદાભ્યન્તરમિષ્યતે ।
શાસ્ત્રબાહ્યં ભવેદ્યત્તુ તદ્બાહ્યમિતિ ભણ્યતે ॥ ૭૮॥

અનેન લક્ષ્યતે યસ્માત્ પ્રયોગઃ કર્મ ચૈવ હિ ।
તસ્માલ્લક્ષણમેતદ્ધિ નાટ્યેઽસ્મિન્ સમ્પ્રયોજિતમ્ ॥ ૭૯॥

અનાચાર્યોષિતા યે ચ યે ચ શાસ્ત્રબહિષ્કૃતાઃ ।
બાહ્યં પ્રયુઞ્જતે તે તુ અજ્ઞાત્વાચાર્યકીં ક્રિયામ્ ॥ ૮૦॥

શબ્દં સ્પર્શં ચ રૂપં ચ રસં ગન્ધં તથૈવ ચ ।
ઇન્દ્રિયાનીઇન્દ્રિયાર્થાંશ્ચ ભાવૈરભિનયેદ્બુધઃ ॥ ૮૧॥

કૃત્વા સાચીકૃતાં દૃષ્ટિં શિરઃ પાર્શ્વનતં તથા ।
તર્જની કર્ણદેશે ચ બુધઃ શબ્દં વિનિર્દિશેત્ ॥ ૮૨॥

કિઞ્ચિદાકુઞ્ચિતે નેત્રે કૃત્વા ભ્રૂક્ષેપમેવ ચ ।
તથાંઽસગણ્ડયોઃ સ્પર્શાત્ સ્પર્શમેવં વિનિર્દિશેત્ ॥ ૮૩॥

કૃત્વા પતાકૌ મૂર્ધસ્થૌ કિંચિત્પ્રચલિતાનનઃ ।
નિર્વર્ણયન્ત્યા દૃષ્ટ્યા ચ રૂપં ત્વભિનયેદ્ બુધઃ ॥ ૮૪॥

કિઞ્ચિદાકુઞ્ચિતે નેત્રે કૃત્વોત્ફુલ્લાં ચ નાસિકામ્ ।
એકોચ્છ્વાસેન ચેષ્ટૌ તુ રસગન્ધૌ  વિનિર્દિશેત્ ॥ ૮૫॥

પઞ્ચાનામિન્દ્રિયાર્થાનાં ભાવા હ્યેતેઽનુભાવિનઃ ।
શ્રોત્રત્વઙ્નેત્રજિહ્વાનાં ઘ્રાણસ્ય ચ તથૈવ હિ ॥ ૮૬॥

ઇન્દ્રિયાર્થાઃ સમનસો ભવન્તિ હ્યનુભાવિનઃ ।
ન વેત્તિ હ્યમનાઃ કિંચિદ્વિષયં પઞ્ચધાગતમ્ ॥ ૮૭॥

મનસસ્ત્રિવિધો ભાવો વિજ્ઞેયોઽભિનયે બુધૈઃ ।
ઇષ્ટસ્તથા હ્યનિષ્ટશ્ચ મધ્યસ્થશ્ચ તથૈવ હિ ॥ ૮૮॥

પ્રહ્લાદનેન ગાત્રસ્ય તથા પુલકિતેન ચ ।
વદનસ્ય વિકાસેન કુર્યાદિષ્ટનિદર્શનમ્ ॥ ૮૯॥

ઇષ્ટે શબ્દે તથા રૂપે સ્પર્શે ગન્ધે તથા રસે ।
ઇન્દ્રિયૈર્મનસા પ્રાપ્તૈઃ સૌમુખ્યં સમ્પ્રદર્શયેત્ ॥ ૯૦॥

પરાવૃત્તેન શિરસા નેત્રનાસાવિકર્ષણૈઃ ।
ચક્ષુષશ્ચાપ્રદાનેન હ્યનિષ્ટમભિનિર્દિશેત્ ॥ ૯૧॥

નાતિહૃષ્ટેન મનસા ન ચાત્યર્થજુગુપ્સયા ।

મધ્યસ્થનૈવ ભાવેન મધ્યસ્થમભિનિર્દિશેત્ ॥ ૯૨॥

તેનેદં તસ્ય વાપીદં સ એવં પ્રકરોતિ વા ।
પરોક્ષાભિનયો યસ્તુ મધ્યસ્થ ઇતિ સ સ્મૃતઃ ॥ ૯૩॥

આત્માનુભાવી યોઽર્થઃ સ્યાદાત્મસ્થ  ઇતિ સ સ્મૃતઃ ।
પરાર્થવર્ણના યત્ર પરસ્થઃ સ તુ સંજ્ઞિતઃ ॥ ૯૪॥

પ્રાયેણ સર્વભાવાનાં કામાન્નિષ્પત્તિરિષ્યતે ।
સ ચેચ્છાગુણસમ્પન્નો બહુધા  પરિકલ્પિતઃ ॥ ૯૫॥

ધર્મકામોઽર્થકામશ્ચ મોક્ષકામસ્તથૈવ ચ ।
સ્ત્રીપુંસયોસ્તુ યોગો યઃ સ તુ કામ ઇતિ સ્મૃતઃ ॥ ૯૬॥

સર્વસ્યૈવ હિ લોકસ્ય સુખદુઃખનિબર્હણઃ ।
ભૂયિષ્ઠં દૃષ્યતે કામઃ સ સુખં વ્યસનેષ્વપિ ॥ ૯૭॥

યઃ સ્ત્રીપુરુષસંયોગો રતિસંભોગકારકઃ ।
સ શૃઙ્ગાર ઇતિ જ્ઞેય ઉપચારકૃતઃ શુભઃ ॥ ૯૮॥

ભૂયિષ્ઠમેવ લોકોઽયં સુખમિચ્છતિ સર્વદા ।
સુખસ્ય હિ સ્ત્રિયો મૂલં નાના શીલાશ્ચા તાઃ પુનઃ ॥ ૯૯॥

દેવદાનવગન્ધર્વરક્ષોનાગપતત્રિણામ્ ।
પિશાચયક્ષવ્યાલાનાં નરવાનરહસ્તિનામ્ ॥ ૧૦૦॥

મૃગમીનોષ્ટ્રમકરખરસૂકરવાજિનામ્ ।
મહીષાજગવાદીનાં તુલ્યશીલાઃ સ્ત્રિયઃ સ્મૃતાઃ ॥ ૧૦૧॥

સ્નિગ્ધૈરઙ્ગૈરુપાઙ્ગૈશ્ચ સ્થિરા મન્દનિમેષિણિ ।
અરોગા દીપ્ત્યુપેતા ચ દાનસત્ત્વાર્જવાન્વિતા ॥ ૧૦૨॥

અલ્પસ્વેદા  સમરતા સ્વલ્પભુક્  સુરતપ્રિયા ।
ગન્ધપુષ્પરતા હૃદ્યા દેવશીલાઙ્ગના સ્મૃતા ॥ ૧૦૩॥

અધર્મશાઠ્યાભિરતા  સ્થિરક્રોધાતિનિષ્ઠુરા  ।
મદ્યમાંસપ્રિઅયા નિત્યં કોપના ચાતિમાનિની ॥  ૧૦૪॥

ચપલા ચાતિલુબ્ધા ચ પરુષા કલહપ્રિયા ।
ઈર્ષ્યાશીલા  ચલસ્નેહા ચાસુરં શીલમાશ્રિતા  „ ૧૦૫॥

ક્રીડાપરા ચારુનેત્રા નખદન્તૈઃ સુપુષ્પિતૈઃ ।
સ્વઙ્ગી ચ સ્થિરભાષી ચ મન્દાપત્યા રતિપ્રિયા ॥ ૧૦૬ ॥

ગીતે વાદ્યે ચ નૃત્તે ચ રતા હૃષ્ટા મૃજાવતી ।
ગન્ધર્વસત્ત્વા વિજ્ઞેયા સ્નિગ્ધત્વક્કેશલોચના ॥ ૧૦૭ ॥

બૃહદ્વ્યાયતસર્વાઙ્ગી રક્તવિસ્તીર્ણલોચના ।
ખરરોમા દિવાસ્વપ્નનિરતાત્યુચ્ચભાષિણી ॥ ૧૦૮ ॥

નખદન્તક્ષતકરી ક્રોધેર્ષ્યાકલહપ્રિયા ।
નિશાવિહારશીલા ચ રાક્ષસં શીલમાશ્રિતા ॥ ૧૦૯ ॥

તીક્ષ્ણનાસાગ્રદશના સુતનુસ્તામ્રલોચના ।
નીલોત્પલસવર્ણા ચ સ્વપ્નશીલાઽતિકોપના ॥ ૧૧૦ ॥

તિર્યગ્ગતિશ્ચલારમ્ભા બહુશ્વાસાતિમાનિની ।
ગન્ધમાલ્યાસવરતાનાગસત્ત્વાઽઙ્ગના સ્મૃતા ॥ ૧૧૧ ॥

અત્યન્તવ્યાવૃતાસ્યા ચ તીક્ષ્ણશીલા સરિત્પ્રિયા ।
સુરાસવક્ષીરરતા બહ્વપત્યા ફલપ્રિયા ॥ ૧૧૨ ॥

નિત્યં શ્વસનશીલાચ તથોદ્યાનવનપ્રિયા ।
ચપલા બહુવાક્છીઘ્રા શાકુનં સત્ત્વમાશ્રિતા ॥ ૧૧૩ ॥

ઊનાધિકાઙ્ગુલિકરા રાત્રૌ નિષ્કુટચારિણિ ।
બાલોદ્વેજનશીલા ચ પિશુના ક્લિષ્ટભાષિણિ ॥ ૧૧૪ ॥

સુરતે કુત્સિતાચારા રોમશાઙ્ગી મહાસ્વના ।
પિશાચસત્ત્વા વિજ્ઞેયા મદ્યમાંસબલિપ્રિયા ॥ ૧૧૫ ॥

સ્વપ્નપ્રસ્વેદનાઙ્ગી ચ સ્થિરશય્યાસનપ્રિયા ।
મેધાવિની બુદ્ધિમતી મદ્યગન્ધામિષપ્રિયા ,, ૧૧૬,,
ચિરદૃષ્ટેષુ હર્ષં ચ કૃતજ્ઞત્વાદુપૈતિ સા ।
અદીર્ઘશાયિની ચૈવ યક્ષશીલાઽઙ્ગના સ્મૃતા ॥ ૧૧૭ ॥

તુલ્યમાનાવમાના યા પરુષત્વક્ ખરસ્વરા ।
શઠાનૃતોદ્ધતકથા વ્યાલસત્ત્વા ચ પિઙ્ગદૃક્ ॥ ૧૧૮ ॥

વિભક્તાઙ્ગી કૃતજ્ઞા ચ ગુરુદેવદ્વિજપ્રિયા ।
ધર્મકામાર્થનિરતા હ્યહઙ્કારવિવર્જિતા ।

સુહૃત્પ્રિયા સુશીલા ચ માનુષં સત્ત્વમાશ્રિતા ॥ ૧૨૦॥

સંહતાલ્પતનુર્હૃષ્ટા પિઙ્ગરોમા છલપ્રિયા ।
પ્રગલ્ભા ચપલા તીક્ષ્ણા વૃક્ષારામવનપ્રિયા ॥ ૧૨૧॥

સ્વલ્પમપ્યુપકારં તુ નિત્યં  યા બહુમન્યતે ।
પ્રસહ્યરતિશીલા ચ વાનરં સત્ત્વમાશ્રિતા ॥ ૧૨૨॥

મહાહનુલલાટા ચ શરીરોપચયાન્વિતા ।
પિઙ્ગાક્ષી રોમશાઙ્ગી ચ ગન્ધમાલ્યાસવપ્રિયા ॥ ૧૨૩॥

કોપના સ્થિરચિત્તા  ચ જલોદ્યાનવનપ્રિયા ।
મધુરાભિરતા ચૈવ હસ્તિસત્ત્વા પ્રકીર્તિતા ॥ ૧૨૪॥

સ્વલ્પોદરી ભગ્નનાસા તનુજઙ્ઘા  વનપ્રિયા ।
ચલવીસ્તીર્ણનયના ચપલા શીઘ્રગામિની ॥ ૧૨૫॥

દિવાત્રાસપરા નિત્યં ગીતવાદ્યરતિપ્રિયા ।
નિવાસસ્થિરચિત્તા ચ મૃગસત્ત્વા પ્રકીર્તિતા ॥ ૧૨૬॥

દીર્ઘપીનોન્નતોરસ્કા ચલા નાતિનિમેષિણી ।
બહુભૃત્યા બહુસુતા મત્સ્યસત્ત્વા જલપ્રિયા ॥ ૧૨૭॥

લમ્બોષ્ઠી સ્વેદબહુલા કિઞ્ચિદ્વિકટગામિની ।
કૃશોદરી પુષ્પફલલવણામ્લકટુપ્રિયા ॥ ૧૨૮॥

ઉદ્બન્ધકટિપાર્શ્વા ચ ખરનિષ્ઠુરભાષિણી ।
અત્યુન્નતકટીગ્રીવા ઉષ્ટ્રસત્ત્વાऽટવીપ્રિયા ॥ ૧૨૯॥

સ્થૂલશીર્ષાઞ્ચિતગ્રીવા દારિતાસ્યા મહસ્વના ।
જ્ઞેયા મકરસત્ત્વા ચ ક્રૂરા મત્સ્યગુણૈર્યુતા ॥ ૧૩૦॥

સ્થૂલજિહ્વોષ્ઠદશના રૂક્ષત્વક્કટુભાષિણી ।
રતિયુદ્ધકરી ધૃષ્ટા નખદન્તક્ષતપ્રિયા ॥ ૧૩૧॥

સપત્નીદ્વેષિણી દક્ષા ચપલા શીઘ્રગામિની ।
સરોગા બહ્વપત્યા ચ ખરસત્ત્વા પ્રકીર્તિતા ॥ ૧૩૨॥

દીર્ઘપૃષ્ઠોદરમુખી રોમશાલી બલાન્વિતા ।
સુસંક્ષિપ્તલલાટા ચ કન્દમૂલફલપ્રિયા ॥ ૧૩૩॥

કૃષ્ણા દંષ્ટોત્કટમુખી હ્રસ્વોદરશિરોરુહા ।
હીનાચારા બહ્વપત્યા સૌકરં સત્ત્વમાશ્રિતા ॥ ૧૩૪॥

સ્થિરા વિભક્તપાર્શ્વોરુકટીપૃષ્ઠશિરોધરા ।
સુભગા દાનશીલા ચ ઋજુસ્થૂલશિરોરુહા ॥ ૧૩૫॥

કૃશા ચઞ્ચલચિત્તા ચ સ્નિગ્ધવાક્છીઘ્રગામિની ।
કામક્રોધપરા ચૈવ હયસત્ત્વાઙ્ગના સ્મૃતા ॥ ૧૩૬।
સ્થૂલપૃષ્ઠાક્ષિદશના તનુપાર્શ્વોદરા સ્થિરા ।
હરિરોમાઞ્ચિતા રૌદ્રી લોકદ્વિષ્ટા રતિપ્રિયા ॥ ૧૩૭॥ ।

કિઞ્ચિદુન્નતવક્ત્રા ચ જલક્રીડાવનપ્રિયા ।
બૃહલ્લલાટા સુશ્રોણી માહિષં સત્ત્વમાશ્રિતા ॥ ૧૩૮॥

કૃશા તનુભુજોરસ્કા નિષ્ટબ્ધસ્થિરલોચના ।
સંક્ષિપ્તપાણિપાદા ચ સૂક્ષ્મરોમસમાચિતા ॥ ૧૩૯॥

ભયશીલા  જલોદ્વિગ્ના બહ્વપત્યા  વનપ્રિયા ।
ચઞ્ચલા શીઘ્રગમના હ્યજસત્ત્વાઽઙ્ગના સ્મૃતા ॥ ૧૪૦॥

ઉદ્બન્ધગાત્રનયના વિજૃમ્ભણપરાયણા ।
દીર્ઘાલ્પવદના સ્વલ્પપાણિપાદવિભૂષિતા ॥ ૧૪૧॥

ઉચ્ચઃસ્વના સ્વલ્પનિદ્રા ક્રોધના સુકૃતપ્રિયા ।
હીનાચારા   કૃતજ્ઞા ચ શ્વશીલા પરિકીર્તિતા ॥ ૧૪૨॥

પૃથુપીનૂન્નતશ્રોણી તનુજઙ્ઘા સુહૃત્પ્રિયા ।
સંક્ષિપ્તપાણિપાદા ચ દૃઢારમ્ભા પ્રજાહિતા ॥ ૧૪૩॥

પિતૃદેવાર્ચનરતા  સત્યશૌચગુરુપ્રિયા ।
સ્થિરા  પરિક્લેશસહા ગવાં સત્ત્વં સમાશ્રિતા ॥ ૧૪૪॥

નાનાશીલાઃ સ્ત્રિયો જ્ઞેયાઃ સ્વં સ્વં સત્ત્વં સમાશ્રિતાઃ ।
વિજ્ઞાય ચ યથાસત્ત્વમુપસેવેત તાઃ પુનઃ ॥ ૧૪૫॥

ઉપચારો યથાસત્ત્વં સ્ત્રીણામલ્પોઽપિ હર્ષદઃ ।
મહાનપ્યન્યથાયુક્તો નૈવ તુષ્ટિકરો ભવેત્ ॥ ૧૪૬॥

યથા સમ્પ્રાર્થિતાવાપ્ત્યા રતિઃ સમુપજાયતે ।
સ્ત્રીપુંસયોશ્ચ રત્યર્થમુપચારો વિધીયતે ॥ ૧૪૭॥

ધર્માર્થં હિ તપશ્ચર્યા સુખાર્થં ધર્મ ઇષ્યતે ।
સુખસ્ય મૂલં પ્રમદાસ્તાસુ સમ્ભોગ ઇષ્યતે ॥ ૧૪૮॥

કામોપભાગો દ્વિવિધો નાટ્યધર્મેઽભિધીયતે ।
બાહ્યાભ્યન્તરતશ્ચૈવ નારીપુરુષસંશ્રયઃ ॥ ૧૪૯॥

આભ્યન્તરઃ પાર્થિવાનાં સ ચ કાર્યસ્તુ નાટકે ।
બાહ્યો વેશ્યાગતશ્ચૈવ સ ચ પ્રકરણે ભવેત્ ॥ ૧૫૦॥

તત્ર રાજોપભોગં તુ વ્યાખ્યાસ્યામ્યનુપૂર્વશઃ ।
ઉપચારવિધિં સમ્યક્ કામતન્ત્રસમુત્થિતમ્ ॥ ૧૫૧॥

ત્રિવિધા પ્રકૃતિઃ સ્ત્રીણાં નાનાસત્ત્વસમુદ્ભવા ।
બાહ્યા ચાભ્યન્તરા ચૈવ સ્યાદ્બાહ્યાભ્યન્તરાપરા ॥ ૧૫૨॥

કુલીનાભ્યન્તરા જ્ઞેયા બાહ્યા વેશ્યાઙ્ગના સ્મૃતા ।
કૃતશૌચા તુ યા નારી સા બાહ્યાભ્યન્તરા સ્મૃતા ॥ ૧૫૩॥

અન્તઃપુરોપચારે તુ કુલજા કન્યકાપિ વા ।
ન હિ રાજોપચારે તુ બાહ્યસ્ત્રીભોગ ઇષ્યતે ॥ ૧૫૪॥

આભ્યન્તરો ભવેદ્રાજ્ઞો  બાહ્યો બાહ્યજનસ્ય ચ ।
દિવ્યવેશાઙ્ગનાનાં હિ રાજ્ઞાં ભવતિ સઙ્ગમઃ ॥ ૧૫૫॥

કુલજાકામિતં યચ્ચ તજ્જ્ઞેયં કન્યકાસ્વપિ ।
યા  ચાપિ વેશ્યા સાપ્યત્ર યથૈવ કુલજા તથા ॥ ૧૫૬॥

ઇહ કામસમુત્પતીર્નાનાભાવસમુદ્ભવા ।
સ્ત્રીણાં વા પુરુષાણાં વા ઉત્તમાધમમધ્યમા ॥ ૧૫૭॥

શ્રવણાદ્દર્શનાદ્રૂપાદઙ્ગલીલાવિચેષ્ટિતૈઃ ।
મધુરૈશ્ચ સમાલાપૈઃ કામઃ સમુપજાયતે ॥ ૧૫૮॥

રૂપગુણાદિસમેતં કલાદિવિજ્ઞાનયૌવનોપેતમ્ ।
દૃષ્ટ્વા પુરુષવિશેષં નારી મદનાતુરા ભવતિ ॥ ૧૫૯॥

તતઃ કામયમાનાનાં નૃણાં સ્ત્રીણામથાપિ ચ ।
કામાભાવેઙ્ગિતાનીહ તજ્જ્ઞઃ સમુપલક્ષયેત્ ॥ ૧૬૦॥

લલિતા ચલપક્ષ્મા ચ તથા ચ મુકુલેક્ષણા ।
સ્રસ્તોત્તરપુટા ચૈવ કામ્યા દૃષ્ટિર્ભવેદિહ ॥ ૧૬૧॥

[વલિતાન્તા સલાલિત્યસંમિતૈર્વ્યઞ્જિતૈરસ્તથા ।
દૃષ્ટિઃ સા લલિતા  નામ સ્ત્રીણામર્ધાવલોકને  ॥ ] ૧૬૧ ॥

ઈષત્સંરક્તગણ્ડસ્તુ સસ્વેદલવચિત્રિતઃ ।
પ્રસ્પન્દમાનરોમાઞ્ચો મુખરાગો ભવેદિહ  ॥ ૧૬૩ ॥

કામ્યેનાઙ્ગવિકારેણ સકટાક્ષનિરીક્ષિતૈઃ ।
તથાભરણસંસ્પર્શૈઃ કર્ણકણ્ડુયનૈરપિ  ॥ ૧૬૪ ॥

અઙ્ગુષ્ઠાગ્રવિલિખનૈઃ સ્તનનાભિપ્રદર્શનૈઃ ।
નખનિસ્તોદનાચ્ચૈવ કેશસંયમનાદપિ  ॥ ૧૬૫ ॥

વેશ્યામેવંવિધૈર્ભાવૈર્લક્ષયેન્મદનાતુરામ્ ।
કુલજાયાસ્તથા ચૈવ પ્રવક્ષ્યામીઙ્ગિતાનિ તુ  ॥ ૧૬૬ ॥

પ્રહસન્તીવ નેત્રાભ્યાં પ્રતતં ચ નિરીક્ષતે ।
સ્મયતે સા નિગૂઢં ચ વાચં ચાધોમુખી વદેત્  ॥ ૧૬૭ ॥

સ્મિતોત્તરા મન્દવાક્યા સ્વેદાકારનિગૂહની ।
પ્રસ્પન્દિતાધરા ચૈવ ચકિતા ચ કુલાઙ્ગના  ॥ ૧૬૮ ॥

એવંવિધૈઃ કામલિઙ્ગૈરપ્રાપ્તસુરતોત્સવા ।
દશસ્થાનગતં કામં નાનાભાવૈઃ પ્રદર્શયેત્  ॥ ૧૬૯ ॥

પ્રથમે ત્વભિલાષઃ સ્યાદ્ દ્વિતીયે ચિન્તનં ભવેત્ ।
અનુસ્મૃતિસ્તૃતીયે તુ ચતુર્થે ગુણકીર્તનમ્  ॥ ૧૭૦ ॥

ઉદ્વેગઃ પઞ્ચમે પ્રોક્તો વિલાપઃ ષષ્ઠ ઉચ્યતે ।
ઉન્માદઃ સપ્તમે જ્ઞેયો ભવેદ્વ્યાધિસ્તથાષ્ટમે  ॥ ૧૭૧ ॥

નવમે જડતા ચૈવ દશમે મરણં ભવેત્ ।
સ્ત્રીપુંસયોરેષ વિધિર્લક્ષણં ચ નિબોધત  ॥ ૧૭૨ ॥

વ્યવસાયાત્સમારબ્ધઃ સંકલ્પેચ્છાસમુદ્ભવઃ ।
સમાગમોપાયકૃતઃ સોઽભિલાષઃ પ્રકીર્તિતઃ  ॥ ૧૭૩ ॥

નિર્યાતિ વિશતિ ચ મુહુઃ કરોતિ ચાકારમેવ મદનસ્ય ।
તિષ્ઠતિ ચ દર્શનપથે પ્રથમસ્થાને સ્થિતા કામે  ॥ ૧૭૪ ॥

કેનોપાયેન સમ્પ્રાપ્તિઃ કથં વાસૌ ભવેન્મમ ।

દૂતીનિવેદિતૈર્ભાવૈરિતિ ચિન્તાં નિદર્શયેત્ ॥ ૧૭૫॥

આકેકરાર્ધવિપ્રેક્ષિતાનિ વલયરશનાપરામર્શઃ ।
નીવીનાભ્યાઃ સંસ્પર્શનં ચ કાર્યં દ્વિતીયે તુ ॥ ૧૭૬॥

સુમુહુર્મુહુર્નિઃશ્વસિતૈર્મનોરથવિચિન્તનૈઃ ।
પ્રદ્વેષાચ્ચાન્યકાર્યાણામનુસ્મૃતિરુદાહૃતા ॥ ૧૭૭॥

નૈવાસને ન શયને ધૃતિમુપલભતે સ્વકર્મણિ વિહસ્તા ।
તચ્ચિન્તોપગતત્વાત્ તૃતીયમેવ પ્રયુઞ્જીત ॥ ૧૭૮॥

અઙ્ગપ્રત્યઙ્ગલીલાભિર્વાક્ચેષ્ટાહસિતેક્ષિતૈઃ ।
નાસ્ત્યન્યઃ સદૃશસ્તેનેત્યેતત્ સ્યાદ્ ગુણકીર્તનમ્ ॥ ૧૭૯॥

ગુણકીર્તનોલ્લુકસનૈરશ્રુસ્વેદાપમાર્જનૈશ્ચાપિ ।
દૂત્યવિરહવિસ્રમ્ભૈરભિનયયોગશ્ચતુર્થે તુ ॥ ૧૮૦॥

આસને શયને ચાપિ ન તુષ્યતિ ન તિષ્ઠતિ ।
નિત્યમેવોત્સુકા ચ સ્યાદુદ્વેગસ્થાનમાશ્રિતા ॥ ૧૮૧॥

ચિન્તાનિઃશ્વાસખેદેન હૃદ્દાહાભિનયેન ચ ।
કુર્યાત્તદેવમત્યન્તમુદ્વેગાભિનયેન ચ ॥ ૧૮૨॥

ઇહ સ્થિત ઇહાસીન ઇહ ચોપગતો મયા ।
ઇતિ તૈસ્તૈર્વિલપિતૈર્વિલાપં સમ્પ્રયોજયેત્ ॥ ૧૮૩॥

ઉદ્વિગ્નાત્યર્થમૌત્સુક્યાદધૃત્યા ચ વિલાપિની ।
તતસ્તતશ્ચ ભ્રમતિ વિલાપસ્થાનમાશ્રિતા ॥ ૧૮૪॥

તત્સંશ્રિતાં કથાં યુઙ્ક્તે સર્વાવસ્થાગતાપિ હિ ।
પુંસઃ પ્રદ્વેષ્ટિ ચાપ્યન્યાનુન્માદઃ સમ્પ્રકીર્તિતઃ ॥ ૧૮૫॥

તિષ્ઠત્યનિમિષદૃષ્ટિર્દીર્ઘં નિઃશ્વસિતિ ગચ્છતિ ધ્યાનમ્ ।
રોદિતિ વિહારકાલે નાટ્યમિદં સ્યાત્તથોન્માદે ॥ ૧૮૬॥

સામદાનાર્થસંભોગૈઃ કામ્યૈઃ સમ્પ્રેષણૈરપિ ।
સર્વૈર્નિરાકૃતૈઃ પશ્ચાદ્ વ્યાધિઃ સમુપજાયતે ॥ ૧૮૭॥

મુહ્યતિ હૃદયં ક્વાપિ પ્રયાતિ શિરસશ્ચ વેદના તીવ્રા ।
ન ધૃતિં ચાપ્યુપલભતે હ્યષ્ટમમેવં પ્રયુઞ્જીત ॥ ૧૮૮॥

પૃષ્ટા  ન કિઞ્ચિત્ પ્રબ્રૂતે ન શ‍ૃણોતિ  ન પશ્યતિ ।
હાકષ્ટવાક્યા તૂષ્ણીકા જડતાયાં ગતસ્મૃતિઃ ॥ ૧૮૯ ॥

અકાણ્ડે દત્તહુંકારા તથા પ્રશિથિલાઙ્ગિકા ।
શ્વાસગ્રસ્તાનના ચૈવ જડતાભિનયે ભવેત્ ॥ ૧૯૦ ॥

સર્વૈઃ કૃતૈઃ પ્રતીકારૈર્યદી નાસ્તિ સમાગમઃ ।
કામાગ્નિના પ્રદીપ્તાયા  જાયતે મરણં તતઃ ॥ ૧૯૧ ॥

એવં સ્થાનાનિ  કાર્યાણિ કામતન્ત્રં સમીક્ષ્ય તુ ।
અપ્રાપ્તૌ યાનિ કામસ્ય વર્જયિત્વા તુ નૈધનમ્ ॥ ૧૯૨ ॥

વિવિધૈઃ પુરુષોઽપ્યેવં વિપ્રલમ્ભસમુદ્ભવૈઃ ।
ભાવૈરેતાનિ કામસ્ય નાનારૂપાણિ યોજયેત્। ॥ ૧૯૩ ॥

એવં કામયમાનાનાં સ્ત્રીણા નૃણામથાપિ વા ।
સામાન્યગુણયોગેન યુઞ્જીતાભિનયં બુધઃ ॥ ૧૯૪ ॥

ચિન્તાનિઃશ્વાસખેદેન હૃદ્દાહાભિનયેન ચ ।
તથાનુગમનાચ્ચાપિ તથૈવાધ્વનિરીક્ષણાત્ ॥ ૧૯૫ ॥

આકાશવીક્ષણાચ્ચાપિ તથા દીનપ્રભાષણાત્ ।
સ્પર્શનાન્મોટનાચ્ચાપિ તથા સાપાશ્રયાશ્રયાત્ ॥ ૧૯૬ ॥

એભિર્નાનાશ્રયોત્પન્નૈર્વિપ્રલમ્ભસમુદ્ભવૈઃ ।
કામસ્થાનાનિ સર્વાણિ ભૂયિષ્ઠં સમ્પ્રયોજયેત્ ॥ ૧૯૭ ॥

સ્રજો ભૂષણગન્ધાંશ્ચ ગૃહાણ્યુપવનાનિ ચ ।
કામાગ્નિના દહ્યમાનઃ શીતલાનિ નિષેવતે ॥ ૧૯૮ ॥

પ્રદહ્યમાનઃ કામાર્તો બહુસ્થાનસમર્દિતઃ ।
પ્રેષયેત્કામતો દૂતીમાત્માવસ્થાપ્રદર્શિનીમ્ ॥૧૯૯ ॥

સન્દેશં ચૈવ દૂત્યાસ્તુ પ્રદદ્યાન્મદનાશ્રયમ્ ।
તસ્યેયં સમવસ્થેતિ કથયેદ્વિનયેન સા ॥ ૨૦૦ ॥

અથાવેદિતભાવાર્થો રત્યુપાયં વિચિન્તયેત્ ।
અયં વિધિર્વિધાનજ્ઞૈઃ કાર્યઃ પ્રચ્છન્નકામિતે ॥ ૨૦૧ ॥

વિધિં રાજોપચારસ્ય પુનર્વક્ષ્યામિ તત્ત્વતઃ ।
અભ્યન્તરગતં સમ્યક્ કામતન્ત્રસમુત્થિતમ્ ॥ ૨૦૨ ॥

સુખદુઃખકૃતાન્ ભાવાન્ નાનાશીલસમુત્થિતાન્ ।
યાન્યાન્ પ્રકુરુતે રાજા તાન્સ્તાન્ લોકાનુવર્તતે ॥ ૨૦૩॥

ન દુર્લભાઃ પાર્થિવાનાં સ્ત્ર્યર્થમાજ્ઞાકૃતાઃ ગુણાઃ ।
દાક્ષિણ્યાત્તુ સમુદ્ભૂતઃ કામો રતિકરો ભવેત્ ॥ ૨૦૪॥

બહુમાનેન દેવીનાં વલ્લભાનાં ભયેન ચ ।
પ્રચ્છન્નકામિતં રાજ્ઞા કાર્યં પરિજનં પ્રતિ ॥ ૨૦૫॥

યદ્યપ્યસ્તિ નરેન્દ્રાણાં કામતન્ત્રમનેકધા ।
પ્રચ્છન્નાકામિતં યત્તુ તદ્ધૈ રતિકરં ભવેત્ ॥ ૨૦૬॥

યદ્વામાભિનિવેશિત્વં યતશ્ચ વિનિવાર્યતે ।
દુર્લભત્વં ચ યન્નાર્યાઃ સા કામસ્ય પરા રતિઃ ॥ ૨૦૭॥

રાજ્ઞામન્તઃપુરજને દિવાસમ્ભોગ ઇષ્યતે ।
વાસોઅપચારો યશ્ચૈઅષાં સ રાત્રૌ પરિકીર્તિતઃ ॥ ૨૦૮॥

પરિપાટ્યાં ફલાર્થે વા નવે પ્રસવ એવ વા ।
દુઃખે ચૈવ પ્રમોદે ચ ષડેતે વાસકાઃ સ્મૃતાઃ ॥ ૨૦૯॥

ઉચિતે વાસકે સ્ત્રીનામૃતુકાલેઽપિ વા નૃપૈઃ ।
પ્રેષ્યાણામથવેષ્ટાનાં કાર્યં ચૈવોપસર્પણમ્ ।૨૧૦॥

તત્ર વાસકસજ્જા ચ વિરહોત્કણ્ઠિતાપિ વા ।
સ્વાધીનભર્તૃકા ચાપિ કલહાન્તરિતાપિ વા ॥ ૨૧૧॥

ખણ્ડિતા વિપ્રલબ્ધા વા તથા પ્રોષિતભર્તૃકા ।
તથાભિસારિકા ચૈવ જ્ઞેયાસ્ત્વષ્ટૌ તુ નયિકાઃ ॥ ૨૧૨॥

ઉચિતે વાસકએ યા તુ રતિસંભોગલાલસા ।
મણ્ડનં કુરુતે હૃષ્ટા સા વૈ વાસકસજ્જિકા ॥ ૨૧૩॥

અનેકકાર્યવ્યાસઙ્ગાદ્યસ્યા નાગચ્છતિ પ્રિયઃ ।
તદનાગતદુઃખાર્તા વિરહોત્કણ્ઠિતા તુ સા ॥ ૨૧૪॥

સુરતાતિરસૈર્બદ્ધો યસ્યાઃ પાર્શ્વે તુ નાયકઃ ।
સાન્દ્રામોદગુણપ્રાપ્તા ભવેત્ સ્વાધીનભર્તૃકા ॥ ૨૧૫॥

ઈર્ષ્યાકલહનિષ્ક્રાન્તો યસ્યા નાગચ્છતિ પ્રિયઃ ।

સામર્ષવશસમ્પ્રાપ્તા કલહાન્તરિતા ભવેત્ ॥ ૨૧૬॥

વ્યાસઙ્ગાદુચિતે યસ્યા વાસકે નાગતઃ પ્રિયઃ ।
તદનાગમદુઃખાર્તા ખણ્ડિતા સા પ્રકીર્તિતા ॥ ૨૧૭॥

યસ્યા દૂતીં પ્રિયઃ પ્રેષ્ય દત્ત્વા સંકેતમેવ વા ।
નાગતઃ કારણેનેહ વિપ્રલબ્ધા તુ સા ભવેત્ ॥ ૨૧૮॥

નાનાકાર્યાણિ સન્ધાય યસ્યા વૈ પ્રોષિતઃ પ્રિયઃ ।
સારૂઢાલકકેશાન્તા ભવેત્ પ્રોષિતભર્તૃકા ॥ ૨૧૯॥

હિત્વા લજ્જાં તુ યા શ્લિષ્ટા મદેન મદનેન ચ ।
અભિસારયતે કાન્તં સા ભવેદભિસારિકા ॥ ૨૨૦॥

આસ્વવસ્થાસુ વિજ્ઞેયા નાયિકા નાટકાશ્રયા ।
એતાસાં ચૈવ વક્ષ્યામિ કામતન્ત્રમનેકધા ॥ ૨૨૧॥

ચિન્તાનિઃશ્વાસખેદેન હૃદ્દાહાભિનયેન ચ ।
સખીભિઃ સહ સંલાપૈરાત્માવસ્થાવલોકનૈઃ ॥ ૨૨૨॥

ગ્લાનિદૈન્યાશ્રુપાતૈશ્ચ રોષસ્યાગમનેન ચ ।
નિર્ભૂષણમૃજાત્વેન દુઃખેન રુદિતેન ચ ॥ ૨૨૩॥

ખણ્ડિતા વિપ્રલબ્ધા વા કલહાન્તરિતાપિ વા ।
તથા પ્રોષિતકાન્તા ચ ભાવાનેતાન્ પ્રયોજયેત્ ॥ ૨૨૪॥

વિચિત્રોજ્જ્વલવેષા તુ પ્રમોદોદ્યોતિતાનના ।
ઉદીર્ણશોભા ચ તથા કાર્યા સ્વાધીનભર્તૃકા ॥ ૨૨૫॥

વેશ્યાયાઃ કુલજાયાયાશ્ચ પ્રેષ્યાયાશ્ચ પ્રયોક્તૃભિઃ ।
એભિર્ભાવવિશેષૈસ્તુ કર્તવ્યમભિસારણમ્ ॥ ૨૨૬॥

સમદા મૃદુચેષ્ટા ચ તથા પરિજનાવૃતા ।
નાનાભરણચિત્રાઙ્ગી ગચ્છેદ્વેશ્યાઙ્ગના શનૈઃ ॥ ૨૨૭॥

સંલીના સ્વેષુ ગાત્રેષુ ત્રસ્તા વિનમિતાનના ।
અવકુણ્ઠનસંવિતા હચ્છેત્તુ કુલજાઙ્ગના ॥ ૨૨૮॥

મદસ્ખલિતસંલાપા વિભ્રમોત્ફુલ્લલોચના ।
આવિદ્ધગતિસંચારા ગચ્છેત્પ્રેષ્યા સમુદ્ધતમ્ ॥ ૨૨૯॥

ગત્વા સા ચેદ્યદા તત્ર પશ્યેત્સુપ્તં પ્રિયં તદા ।
અનેન તૂપચારેણ તસ્ય કુર્યાત્પ્રબોધનમ્ ॥ ૨૩૦॥

અલઙ્કારેણ કુલજા વેશ્યા ગન્ધૈસ્તુ શીતલૈઃ ।
પ્રેષ્યા તુ વસ્ત્રવ્યજનૈઃ કુર્વીત પ્રતિબોધનમ્ ॥ ૨૩૧॥

કુલાઙ્ગનાનામેવાયં નોક્તઃ કામાશ્રયો વિધિઃ ।
સર્વાવસ્થાનુભાવ્યં હિ યસ્માદ્ભવતિ નાટકમ્ ॥ ૨૩૨॥

નવકામપ્રવૃત્તાયા ક્રુદ્ધાયા વા સમાગમે ।
સાપદેશૈરુપાયૈસ્તુ વાસકં સમ્પ્રયોજયેત્ ॥ ૨૩૩॥

નાનાલઙ્કારવસ્ત્રાણિ ગન્ધમાલ્યાનિ ચૈવ હિ ।
પ્રિયયોજિતભુક્તાનિ નિષેવેત મુદાન્વિતઃ ॥ ૨૩૪॥

ન તથા ભવતિ મનુષ્યો મદનવશઃ કામિનીમલભમાનઃ ।
દ્વિગુણોપજાતહર્ષો ભવતિ યથ સઙ્ગતઃ પ્રિયયા ॥ ૨૩૫॥

વિલાસભાવેઙ્ગિતવાક્યલીલામાધુર્યવિસ્તારગુણોપપન્નઃ ।
પરસ્પરપ્રેમનિરીક્ષિતેન સમાગમઃ કામકૃતસ્તુ કાર્યઃ ॥ ૨૩૬॥

તતઃ પ્રવૃત્તે મદને ઉપચારસમુદ્ભવે ।
વાસોપચારઃ કર્તવ્યો નાયકાગમનં પ્રતિ ॥ ૨૩૭॥

ગન્ધમાલ્યે ગૃહીત્વા તુ ચૂર્ણવાસસ્તથૈવ ચ ।
આદર્શો લીલયા ગૃહ્યશ્છન્દતો વા પુનઃ પુનઃ ॥ ૨૩૮॥

વાસોપચારે નાત્યર્થં ભૂષણગ્રહણં ભવેત્ ।
રશનાનૂપુરપ્રાયં સ્વનવચ્ચ પ્રશસ્યતે ॥ ૨૩૯॥

નામ્બરગ્રહણં રઙ્ગે ન સ્નાનં ન વિલેપનમ્ ।
નાઞ્જનં નાઙ્ગરાગશ્ચ કેશસંયમનં તથા ॥ ૧૪૦॥

નાપ્રાવૃત્તા નૈકવસ્ત્રા  ન રાગમધરસ્ય તુ ।
ઉત્તમા મધ્યમા વાપિ કુર્વીત પ્રમદા ક્વચિત્ ॥ ૨૪૧॥

અધમાનાં ભવેદેષ સર્વ એવ વિધિઃ સદા ।
કારણાન્તરમાસાદ્ય તસ્માદપિ ન કારયેત્ ॥ ૨૪૨॥

પ્રેષ્યાદીનાં ચ નારીણાં નરાણાં વાપિ નાટકે ।
ભૂષણગ્રહણં કાર્યં પુષ્પગ્રહણમેવ ચ ॥ ૨૪૩॥

ગૃહીતમણ્ડના ચાપિ પ્રતીક્ષેત પ્રિયાગમમ્ ।
લીલયા મણ્ડિતં વેષં કુર્યાદ્યન્ન વિરુધ્યતે ॥ ૨૪૪॥

વિધિવદ્વાસકં કુર્યાન્નાયિકા નાયકાગમે ।
પ્રતીક્ષમાણા ચ તતો નાલિકાશબ્દમાદિશેત્ ॥ ૨૪૫॥

શ્રુત્વા તુ નાલિકાશબ્દં નાયકાગમવિક્લવા ।
વિષણ્ણા વેપમાના ચ ગચ્છેત્તોરણમેવ ચ ॥ ૨૪૬॥

તોરણં વામહસ્તેન કવાટં દક્ષિણેન ચ ।
ગૃહીત્વા તોરણાશ્લિષ્ટા સમ્પ્રતીક્ષેત નાયકમ્ ॥ ૨૪૭॥

શઙ્કાં ચિન્તાં ભયં ચૈવ પ્રકુર્યાત્તોરણાશ્રિતા ।
અદૃષ્ટ્વા રમણં નારી વિષણ્ણા ચ ક્ષણં ભવેત્ ॥ ૨૪૮॥

દીર્ઘં ચૈવ વિનિઃશ્વસ્ય નયનામ્બુ નિપાતયેત્ ।
સન્નં ચ હૃદયં કૃત્વા વિસૃજેતદઙ્ગમાસને ॥ ૨૪૯॥

વ્યાક્ષેપાદ્વિમૃશેચ્ચાપિ નાયકાગમનં પ્રતિ ।
તૈસ્તૈર્વિચારણોપાયૈઃ શુભાશુભસમુત્થિતૈઃ ॥ ૨૫૦॥

ગુરુકાર્યેણ મિત્રૈર્વા મન્ત્રિણા રાજ્યચિન્તયા ।
અનુબદ્ધઃ પ્રિયં કિં નુ વૃતો વલ્લભયાપિ વા ॥ ૨૫૧॥

ઉત્પાતાન્નિર્દિશેચ્ચાપિ શુભાશુભસમુત્થિતાન્ ।
નિમિતૈરાત્મસંસ્થૈસ્તુ સ્ફુરિતૈઃ સ્પન્દિઅતૈસ્તથા ॥ ૨૫૨॥

શોભનેષુ તુ કાર્યેષુ નિમિત્તં વામતઃ સ્ત્રિયાઃ ।
અનિષ્ટેષ્વથ સર્વેષુ નિમિત્તં દક્ષિણં ભવેત્ ॥ ૨૫૩॥

સવ્યં નેત્રં લલાટં ચ ભ્રૂનાસોષ્ઠં તથૈવ ચ ।
ઉરુબાહુસ્તનં ચૈવ સ્ફુરેદ્યદિ સમાગમઃ ॥ ૨૫૪॥

એતેષમન્યથાભાવે દુર્નિમિત્તં વિનિર્દિશેત્ ।
દર્શને દુર્નિમિત્તસ્ય મોહં ગચ્છેત્ક્ષણં તતઃ ॥ ૨૫૫॥

અનાગમે નાયકસ્ય કાર્યો ગણ્ડાશ્રયઃ કરઃ ।
ભૂષણે ચાપ્યવજ્ઞાનં રોદનં ચ સમાચરેત્ ॥ ૨૫૬॥

અથ ચેચ્છોભનં તત્સ્યાન્નિમિત્તં નાયકાગમે ।

સૂચ્યો નાયિકયાસન્નો ગન્ધાઘ્રાણેન નાયકઃ ॥ ૨૫૭॥

દૃષ્ટ્વા ચોત્થાય સંહૃષ્ટા પ્રત્યુદ્ગચ્છેદ્યથાવિધિ ।
તતઃ કાન્તં નિરીક્ષેત પ્રહર્ષોત્ફુલ્લલોચના ॥ ૨૫૮॥

સખીસ્કન્ધાર્પિતકરા કૃત્વા સ્થાનકમાયતમ્ ।
દર્શયેત તતઃ કાન્તં સચિહ્નં સરસવ્રણમ્ ॥ ૧૫૯॥

યદિ સ્યાદપરાદ્ધસ્તુ કૃતૈસ્તૈસ્તૈરુપક્રમૈઃ ।
ઉપાલમ્ભકૃઅતૈર્વાક્યૈરુપાલભ્યસ્તુ નાયકઃ ॥ ૨૬૦॥

માનાપમાનસંમોહૈરવહિત્થભયક્રમૈઃ ।
વચનસ્ય સમુત્પત્તિઃ સ્ત્રીણામીર્ષ્યાકૃતા ભવેત્ ॥ ૨૬૧॥

વિસ્રંભસ્નેહરાગેષુ સન્દેહે પ્રણયે તથા ।
પરિતોષે ચ ધર્ષે ચ દાક્ષિણ્યાક્ષેપવિભ્રમે ॥ ૨૬૨॥

ધર્માર્થકામયોગેષુ પ્રચ્છન્નવચનેષુ ચ ।
હાસ્યે કુતૂહલે ચૈવ સંભ્રમે વ્યસને તથા ॥ ૨૬૩॥

સ્ત્રીપુંસયોઃ ક્રોધકૃતે પૃથઙ્મિશ્રે તથાપિ વા ।
અનાભાષ્યોઽપિ સંભાષ્યઃ પ્રિય એભિસ્તુ કારણૈઃ ॥ ૨૬૪॥

યત્ર સ્નેહો ભવેત્તત્ર હીર્ષ્યા મદનસંભવા ।
ચતસ્રો યોનયસ્તસ્યાઃ કીર્ત્યમાના નિબોધત ॥ ૨૬૫॥

વૈમનસ્યં વ્યલીકં ચ વિપ્રિયં મન્યુરેવ ચ ।
એતેષાં સમ્પ્રવક્ષ્યામિ લક્ષણાનિ યથાક્રમમ્ ॥ ૨૬૬॥

નિદ્રાખેદાલસગતિં સચિહ્નં સરસવ્રણમ્ ।
એવવિધં પ્રિયં દૃષ્ટ્વા વૈમનસ્યં ભવેત્ સ્ત્રિયાઃ ॥ ૨૬૭॥

નિદ્રાભ્યસૂયિતાવેક્ષણેન રોષપ્રકમ્પમાનાઙ્ગ્યા ।
સાધ્વિતિ સુષ્ઠ્વિતિ વચનૈઃ શોભત ઇત્યેવમભિનેયમ્ ॥ ૨૬૮॥

બહુધા વાર્યમાણોઽપિ યસ્તસ્મિન્નેવ દૃશ્યતે ।
સંઘર્ષમત્સરાત્તત્ર વ્યલીકં જાયતે સ્ત્રિયાઃ ॥ ૨૬૯॥

કૃત્વોરસિ વામકરં દક્ષિણહસ્તં તથા વિધુન્વન્ત્યા ।
ચરણવિનિષ્ઠમ્ભેન ચ કાર્યોઽભિનયો વ્યલીકે તુ ॥ ૨૭૦॥

જીવન્ત્યા ત્વયિ જીવામિ દાસોઽહં ત્વં ચ મે પ્રિયા ।
ઉક્ત્વૈવં યોઽન્યથા કુર્યાદ્વિપ્રિયં તત્ર જાયતે ॥ ૨૭૧॥

દૂતીલેખપ્રતિવચનભેદનૈઃ ક્રોધહસિતરુદિતૈશ્ચ ।
વિપ્રિયકરણેઽભિનયઃ સશિરઃકમ્પૈશ્ચ કર્તવ્યઃ ॥ ૨૭૨॥

પ્રતિપક્ષસકાશાત્તુ યઃ સૌભાગ્યવિકત્થનઃ ।
ઉપસર્પેત્ સચિન્હસ્તુ મન્યુસ્તત્રોપજાયતે ॥ ૨૭૩॥

વલયપરિવર્તનૈરથ સુશિથલમુત્ક્ષેપેણેન રશનાયાઃ ।
મન્યુસ્ત્વભિનેતવ્યઃ સશઙ્કિતં બાષ્પપૂર્ણાક્ષ્યા ॥ ૨૭૪॥

દૃષ્ટ્વા સ્થિતં પ્રિયતમં સશઙ્કિતં સાપરાધમતિલજ્જમ્ ।
ઈર્ષ્યાવચનસમુત્થૈઃ ખેદયિતવ્યો હ્યુપાલમ્ભૈઃ ॥ ૨૭૫॥

ન ચ નિષ્ઠુરમભિભાષ્યો ન ચાપ્યતિક્રોધનસ્તુ પરિહાસઃ ।
બાષ્પોન્મિશ્રૈર્વચનૈરાત્મોપન્યાસસંયુક્તૈઃ ॥ ૨૭૬॥

મધ્યાઙ્ગુલ્યઙ્ગુષ્ઠાગ્રવિચ્યવાત્પાણિનોરસિ કૃતેન ।
ઉદ્વર્તિતનેત્રતયા પ્રતતૈરભિવીક્ષણૈશ્ચાપિ ॥ ૨૭૭॥

કટિહસ્તવિવર્તનયા વિચ્છિન્નતયા તથાઞ્જલેઃ કરણાત્ ।
મૂર્ધભ્રમણનિહઞ્ચિતનિપાતસંશ્લેઅષણાચ્ચાપિ ॥ ૨૭૮॥

અવહિત્થવીક્ષણાદ્વા અઙ્ગુલિભઙ્ગેન તર્જનૈલલિતૈઃ ।
એભિર્ભાવવિશેષૈરનુનયનેષ્વભિનયઃ કાર્યઃ ॥ ૨૭૯॥

શોભસે સાધુ દૃષ્ટોઽસિ ગચ્છ ત્વં કિં વિલમ્બસે ।
મા માં સ્પ્રાક્ષીઃ પ્રિયા યત્ર તત્ર યા તે હૃદિ સ્થિતા ॥ ૨૮૦॥

ગચ્છેત્યુક્ત્વા પરાવૃત્ય વિનિવૃત્તાન્તરેણ તુ ।
કેનચિદ્વચનાર્થેન પ્રહર્ષં યોજયેત્પુનઃ ॥ ૨૮૧॥

રભસગ્રહણાચ્ચાપિ હસ્તે વસ્ત્રે ચ મૂર્ધનિ ।
કાર્યં પ્રસાદનં નાર્યા હ્યપરાધં સમીક્ષ્ય તુ ॥ ૨૮૨॥

હસ્તે વસ્ત્રેઽથ કેશાન્તે નાર્યાપ્યથ ગૃહીતયા ।
કાન્તમેવોપસર્પન્ત્યા કર્તવ્યં મોક્ષણં શનૈઃ ॥ ૨૮૩॥

ગૃહીતાયાથ કેશાન્તે હસ્તે વસ્ત્રેઽથવા પુનઃ ।
હું મુઞ્ચેત્યુપસર્પન્ત્યા વાચ્યઃ સ્પર્શાલસં પ્રિયઃ ॥ ૨૮૪॥

પાદાગ્રસ્થિતયા નાર્યા કિંચિત્કુટ્ટમિતોત્કટમ્ ।
અશ્વક્રાન્તેન  કર્તવ્યં કેશાનાં મોક્ષણં શનૈઃ ॥ ૨૮૫॥

અમુચ્યમાને કેશાન્તે સંજાતસ્વેદલેશયા ।
હં હુ મુઞ્ચાપસર્પેતિ વાચ્યઃ સ્પર્શાલસાઙ્ગયા ॥ ૨૮૬॥

ગચ્છેતિ રોષવાક્યેન ગત્વા પ્રતિનિવૃત્ય ચ ।
કેનચિદ્વચનાર્થેન વાચ્યં યાસ્યસિ નેતિ ચ ॥ ૨૮૭॥

વિધૂનનેન હસ્તેન હુંકારં સમ્પ્રયોજયેત્ ।
સ ચાવધૂનને કાર્યઃ શપથૈર્વ્યાજ એવ ચ ॥ ૨૮૮॥

અક્ષ્ણોઃ સંવરણે કાર્યં પૃષ્ઠતશ્ચોપગૂહનમ્ ।
નાર્યાસ્ત્વપહૃતે વસ્ત્રે દીપચ્છાદનમેવ ચ ॥ ૨૮૯॥

તાવત્ ખેદયિતવ્યસ્તુ યાવત્પાદગતો ભવેત્ ।
તતશ્ચરણયોર્યાતે કુર્યાદ્દૂતીનિરીક્ષણમ્ ॥ ૨૯૦॥

ઉત્થાપ્યાલિઙ્ગયેચ્ચૈવ નાયિકા નાયકં તતઃ ।
રતિભોગગતા હૃષ્ટા શયનાભિમુખી વ્રજેત્ ॥ ૨૯૧॥

એતદ્ગીતવિધાનેન સુકુમારેણ યોજયેત્ ।
યદા શૃઙ્ગારસંયુક્તં રતિસમ્ભોગકારણમ્ ॥ ૨૯૨॥

યદા ચાકાશપુરુષપરસ્થવચનાશ્રયમ્ ।
ભવેત્કાવ્યં તદા હ્યેષ કર્તવ્યોઽભિનયઃ સ્ત્રિયા ॥ ૨૯૩॥

યદન્તપુરસમ્બન્ધં કાર્યં ભવતિ નાટકે ।
શૃઙ્ગારરસસંયુક્તં તત્રાપ્યેષ વિધિર્ભવેત્॥ ૨૯૪॥

ન કાર્યં શયનં રઙ્ગે નાટ્યધર્મં વિજાનતા ।
કેનચિદ્વચનાર્થેન અઙ્કચ્છેદો વિધીયતે ॥ ૨૯૫॥

યદ્વા શયીતાર્થવશાદેકાકી સહિતોઽપિ વા ।
ચુમ્બનાલિઙ્ગનં ચૈવ તથ ગુહ્યં ચ યદ્ભવેત્ ॥ ૨૯૬॥

દન્તચ્છેદ્યં નખચ્છેદ્યં નીવીસ્રંસનમેવ ચ ।
સ્તનાન્તરવિમર્દં ચ રઙ્ગમધ્યે ન કારયેત્ ॥ ૨૯૭॥

ભોજનં સલિલક્રીડા તથા લજ્જાકરં ચ યત્ ।

એવંવિધં ભવેદ્યદ્યત્તત્તદ્રઙ્ગે ન કારયેત્ ॥ ૨૯૮॥

પિતાપુત્રસ્નુષાશ્વશ્રૂદૃશ્યં યસ્માત્તુ નાટકમ્ ।
તસ્માદેતાનિ સર્વાણિ વર્જનીયાનિ યત્નતઃ ॥ ૨૯૯॥

વાક્યૈઃ સાતિશયૈઃ શ્રવ્યૈર્મધુરૈર્નાતિનિષ્ઠુરૈઃ ।
હિતોપદેશસંયુક્તૈસ્તજ્જ્ઞઃ કુર્યાત્તુ નાટકમ્ ॥ ૩૦૦॥

એવમન્તઃપુરકૃતઃ કાર્યસ્ત્વભિનયો બુધઃ ।
સમાગમેઽથ નારીણાં વાચ્યાનિ મદનાશ્રયે ॥ ૩૦૧॥

પ્રિયેષુ વચનાનીહ યાનિ તાનિ નિબોધત ।
પ્રિઅયઃ કાન્તો વિનીતશ્ચ નાથઃ સ્વામ્યથ જીવિતમ્ ॥ ૩૦૨॥

નન્દનશ્ચેત્યભિપ્રીતે વચનાનિ ભવન્તિ હિ ।
દુઃશીલોઽથ દુરાચારઃ શઠો વામો વિકત્થનઃ ॥ ૩૦૩॥

નિર્લજ્જો નિષ્ઠુરશ્ચૈઅવ પ્રિયઃ ક્રોધેઽભિધીયતે ।
યો વિપ્રિયં ન કુરુતે ન ચાયુક્તં પ્રભાષતે ॥ ૩૦૪॥

તથાર્જવસમાચારઃ સ પ્રિયસ્ત્વભિધીયતે ।
અન્યનારીસમુદ્ભૂતં ચિહ્નં યસ્ય ન દૃષ્યતે ॥ ૩૦૫॥

અધરે વા શરીરે વા સ કાન્ત ઇતિ ભાષ્યતે ।
સંક્રુદ્ધેઽપિ હિ યો નાર્યા નોત્તરં પ્રતિપદ્યતે ॥ ૩૦૬॥

પરુષં વા ન વદતિ વિનીતઃ સાઽભિધીયતે ।
હિતૈષી રક્ષણે શક્તો ન માની ન  ચ મત્સરી ॥ ૩૦૭॥

સર્વકાર્યેષ્વસંમૂઢઃ સ નાથ ઇતિ સંજ્ઞિતઃ ।
સામદાનાર્થસંભોગૈસ્તથા લાલનપાલનૈઃ ॥ ૩૦૮॥

નારીં નિષેવતે યસ્તુ સ સ્વામીત્યભિધીયતે ।
નારીપ્સિતૈરભિપ્રાયૈર્નિપુણં શયનક્રિયામ્ ॥ ૩૦૯॥

કરોતિ યસ્તુ સંભોગે સ જીવિતમિતિ સ્મૃતઃ ।
કુલીનો ધૃતિમાન્દક્ષો દક્ષિણો વાગ્વિશારદઃ ॥ ૩૧૦॥

શ્લાઘનીયઃ સખીમધ્યે નન્દનઃ સોઽભિધીયતે ।
એતે વચનવિન્યાસા રતિપ્રીતિકરાઃ સ્મૃતાઃ ॥ ૩૧૧॥

તથા ચાપ્રીતિવાક્યાનિ ગદતો મે નિબોધત ।
નિષ્ઠુરશ્ચાહિષ્ણુશ્ચ માનિ ધૃષ્ટો વિકત્થનઃ ॥ ૩૧૨॥

અનવસ્થિતચિત્તશ્ચ દુઃશીલ ઇતિ સ સ્મૃતઃ ।
તાડનં બન્ધનં ચાપિ યો વિમૃશ્ય સમાચરેત્ ॥ ૩૧૩॥

તથા પરુષવાક્યશ્ચ દુરાચારઃ સ તન્ચતે ।
વાચૈઅવ મધુરો યસ્તુ કર્મણ નોપપાદકઃ ॥ ૩૧૪॥

યોષિતઃ કિઞ્ચિદપ્યર્થં સ શઠઃ પરિભાષ્યતે ।
વાર્યતે યત્ર યત્રાર્થે તત્તદેવ કરોતિ યઃ ॥ ૩૧૫॥

વિપરીતનિવેશી ચ સ વામ ઇતિ સંજ્ઞિતઃ ।
સરસવ્રણચિહ્નો યઃ સ્ત્રીસૌભાગ્યવિકત્થનઃ ॥ ૩૧૬॥

અતિમાની તથા સ્તબ્ધો વિકત્થન ઇતિ સ્મૃતઃ ।
વાર્યમાણો દૃઢતરં યો નારીમુપસર્પતિ ॥ ૩૧૭॥

સચિહ્નઃ સાપરાધશ્ચ સ નિર્લજ્જ ઇતિ સ્મૃતઃ ।
યોઽપરાદ્ધસ્તુ સહસા નારીં સેવિતુમિચ્છતિ ॥ ૩૧૮॥

અપ્રસાદનબુદ્ધિશ્ચ નિષ્ઠુરઃ સોઽભિધીયતે ।
એતે વચનવિન્યાસાઃ પ્રિયાપ્રિયવિભાષિતાઃ ॥ ૩૧૯॥

નર્તકીસંશ્રિતાઃ કાર્યા બહવોઽન્યેઽપિ નાટકે ।
એષ ગીતવિધાને તુ સુકુમારે વિધિર્ભવેત્ ॥ ૩૨૦॥

શૃઙ્ગારરસસંભૂતો રતિસંભોગખેદનઃ ।
યચ્ચૈવાકાશપુરુષં પરસ્થવચનાશ્રયમ્ ॥ ૩૨૧॥

શૃઙ્ગાર એવં વાચ્યં સ્યાત્તત્રાપ્યેષ ક્રમો ભવેત્ ।
યદ્વા પુરુસંબન્ધં કાર્યં ભવતિ નાટકે ॥ ૩૨૨॥

શૃઙ્ગારરસસંયુક્તં તત્રાપ્યેષ ક્રમો ભવેત્ ।
એવમન્તઃપુરગતઃ પ્રયોજ્યોઽભિનયો ભવેત્ ॥ ૩૨૩॥

દિવ્યાઙ્ગનાનાં તુ વિધિં વ્યાખ્યાસ્યમ્યનુપૂર્વશઃ ।
નિત્યમેવોજ્વલો વેષો નિત્યં પ્રમુદિતં મનઃ ॥ ૩૨૪॥

નિત્યમેવ સુખઃ કાલો દેવાનાં લલિતાશ્રયઃ ।
ન ચૈર્ષ્યા નૈવ ચ ક્રોધો નાસૂયા ન પ્રસાદનમ્ ॥ ૩૨૫॥

દિવ્યાનાં દૃષ્યતે પુંસાં શૃઙ્ગારે યોષિતાં તથા ।
યે ભાવા માનુષાણાં સ્યુર્યદઙ્ગં યચ્ચ ચેષ્ટિતમ્ ॥ ૩૨૬ ॥

સર્વં તદેવ કર્તવ્યં દિવ્યૈર્માનુષસઙ્ગમે ।
યદા માનુષસંભોગો દિવ્યાનાં યોષિતાં ભવત્ ॥ ૩૨૭ ॥

તદા સર્વાઃ પ્રકર્તવ્યા યે ભાવા માનુષાશ્રયાઃ ।
શાપભ્રંશાત્તુ દિવ્યાનાં તથા ચાપત્યલિપ્સયા ॥ ૩૨૮ ॥

કાર્યો માનુષસંયોગઃ શૃઙ્ગારરસસંશ્રયઃ ।
પુષ્પૈર્ભૂષણજૈઃ શબ્દૈરદૃશ્યાપિ પ્રલોભયેત્ ॥ ૩૨૯ ॥

પુનઃ સંદર્શનં દત્ત્વા ક્ષણાદન્તરિતા ભવેત્ ।
વસ્ત્રાભરણમાલ્યાદ્યૈર્લેખસમ્પ્રેષણૈરપિ ॥ ૩૩૦ ॥

ઈદૃશૈરુપચારૈસ્તુ સમુન્માદ્યસ્તુ નાયકઃ ।
ઉન્માદનાત્સમુદ્ભૂતઃ કામો રતિકરો ભવેત્ ॥ ૩૩૧ ॥

સ્વભાવોપગતો યસ્તુ નાસાવત્યર્થભાવિકઃ ।
એવં રાજોપચારો હિ કર્તવ્યોઽભ્યન્તરાશ્રયઃ ॥ ૩૩૨ ॥

બાહ્યમપ્યુપચારં તુ પ્રવક્ષ્યામ્યથ વૈશિકે ।
ઇતિ ભારતીયે નાટ્યશાસ્ત્રે સામાન્યાભિનયો નામાધ્યાયો દ્વાવિંશઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 22*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*